# Ramamattebha Stotram

# राममत्तेभस्तोत्रम्

## Document Information

Text title : Ramamattebha Stotram

File name : rAmamattebhastotram.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Author : Mahadeva

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2023

*sanskritdocuments.org*

# राममत्तेभस्तोत्रम्

श्रीकामुको निखिलनाकालयैर्विपुलशोकाकुलैरभिनतो
रेखारथाङ्गवरशङ्खाञ्चितः कपटशाखामृगैः सह सुरैः ।
यो गामुपेत्य बहुवेगान्वितः कलितयागात् स्वयं दशरथात्
श्लाघाशतैर्दिविषदोघार्पितैः सजलमेघाकृतिः समजनि ॥ १॥

वाचा मुनेस्तदनु वाचालितज्यधनुराचाम्यजीवनमिषून्
तुच्छात्मनां स्वतनुदुच्छायसन्तमससञ्छादितान्तरनिशाम् ।
आजानपावनसरोजायमानपदभाजा कणेन रजसः
कष्टं स्त्रिया झटिति निष्टङ्कितं विदधदिष्टं च योऽदित मुनेः ॥ २॥

कुण्ठान्यशक्तिशितिकण्ठाशुगासनमरं ठात्कृतं भञ्जयन्
व्रीडास्मरस्फुरणनीडायितां च जनक्रेडापतेरात्मजाम् ।
रूढानुरागकमुदूढामुपेत्य पथि मूढाशयं प्रतिघया
शोणाक्षमप्यथ भृगूणामधीशमपरीणावलेपमतनोत् ॥ ३॥

ताताज्ञ्या तदनु सीतान्वितो भुवनपाता समेत्य विपिनं
यथार्थ्यवेदिमुनिनाथार्थतो विमतमाधाय पञ्चवटिकाम् ।
गोदावरीविगनादानुबन्धबहुमोदावहाधिवसन्
क्रोधादरं विपुलयोधाधरं विषममेधाधरं खरमहन् ॥ ४॥

नानामुखोक्तिबहुमानागतं झटिति लीनायुषं च हरिणं
आपाद्य यातुहृतभूपात्मजाविरहतापातुरो वनभुवि ।
शेफालिकामिलितरेफाधिकाररव्यरवरेफायिताधिकधृतिः
क्षीबाशयं तद्नु चाबधितोष्णकरशाबार्थमिन्द्रतनयम् ॥ ५॥

........ missing in the manuscript

प्राभातिकार्कफललोभाभियुक्तकपिनाभातदारकुशलः ।
भीमाशुगैस्त्रसति सामावलम्बिनि विनामाश्रये जलनिधौ
आयासलेशमपहायालिकृज्झटिति जायामुषः पुरमगात् ॥ ६॥

श्रीराशयः सकलवीराग्रणीरहितमाराय सैनिकयुतः
    कालात्मकः स्वभुजलीलावमुक्तशरजालाहताशरगणः ।
दावानलः खलु यथा वा तृणं युधि तथैवातृणोद् दशमुखं
    नैशाचरीं तदनुजे शास्त्रतो विलसदाशावतीं श्रियमधात् ॥ ७॥

योषामुपेत्य गतदोषां ततोऽभजत तोषान्वितो निजपुरे
    नीहारशीतलविदेहात्मजाङ्ग मिलदीहानुरूपविहृति ।
डोलाविहारमथ तालन्विताभिनयमेलाधिको ह्यनुभवन्
    साक्षात् पुरोऽस्तु धनुर्दीक्षागुरुर्मम स रक्षामणिस्त्रिजगताम् ॥ ८॥

मत्तेभयूथमिदमुत्तेजिताशुगनिकृत्तेन्द्रवैरिशिरसे
    त्रस्तापतज्जनसमस्तावनप्रणयविस्तारितात्मयशसे ।
श्रीजानकीसहितराजाधिराजतनवे जायतां सदुपदा
    पादेऽर्पितं ननु महादेवनामकविना देवतार्चितपदे ॥ ९॥

इति महादेवविरचितं श्रीराममत्तेभं सम्पूर्णम् ।

स्तोत्रसमुच्चयः २ (७२)

The Ramamallehhaslotra (72) is of particular interest because of its special form of composition. The poet employs the dvAdashaprAsa, repetition of a syllable twelve times in each verse (the second syllable of each yati), in a different way, using the repeated syllables in the alphabetical order. The author, Mahadeva, is probably the same as the author of the naTeshAShTaka.

Proofread by Rajesh Thyagarajan

*Ramamattebha Stotram*

pdf was typeset on May 11, 2023

Please send corrections to *sanskrit@cheerful.com*